प्रतिमुक्तः, त्रि, ( प्रतिमुच्यते स्मेति । प्रति+मुच्+क्तः । ) परिहितवस्त्रादिः । इत्यमरः । ३।८।६५ ॥ (परित्यक्तः । यथा, रघुः । ४ । ४३ ।

"गृहीतप्रतिमुक्तस्य स धर्म्मविजयी नृपः ।
श्रियं महेन्द्रनाथस्य जहार न तु मेदिनीम् ॥"

बद्धः । यथा, भागवते । ३ । १८ । १० ।

"न त्वत्पाशैः प्रतिमुक्तस्य वीरा
विकत्थनं तव गृह्णन्त्यभद्र ॥"

प्रतिनिवृत्तः । विमुक्तः । यथा, मार्कण्डेये ।१५।१।

"नरकात् प्रतिमुक्तस्तु कृमिः पतितयाजकः ॥"

प्रत्यर्पितः । यथा, रघुः । १६ । ५६ ।

"तद्भ्रतीभिर्मदरागशोभां
विलोचनेषु प्रतिमुक्तमासाम् ॥" )

प्रतियत्नः, पुं, ( प्रतियत्यते इति । प्रति+यत् प्रयत्ने+"यजयाचयतविच्छप्रच्छरक्षो नङ् ।" ३ । ३ । ९० । इति नङ् । ) लिप्सा । वाञ्छा । उपग्रहः । बन्दी । इत्यमरः । ३ । ३ । १०६ ॥ निग्रहादिः । सतो गुणान्तराधानम् । इति भरतः ॥ संस्कारः । इति स्वामी ॥ (यथा, माघे ।३।५४ ।

"सुगन्धितामप्रतियत्नपूर्व्वां
बिभ्रन्ति यत्र प्रमदाय पुंसाम् ॥"

"यत्र पुरि न प्रतियत्नः संस्कारः पूर्व्वो यस्यास्ताम् ।" इति तट्टीकायां मल्लिनाथः ॥ ) ग्रहणादिः । इति रामाश्रमः ॥ प्रतियत्नः । इति मुकुटः ॥

"प्रतियत्नस्तु संस्कारलिप्सोपग्रहणेषु च ॥"
इति मेदिनी । ने, १६६ ॥

रचना । इति जटाधरः ॥ प्रयत्नवति, त्रि । इति त्रिकाण्डशेषः ॥

प्रतियातना, स्त्री, ( प्रतियात्यते अनया इति । प्रति+यत्+णिच्+"ण्यासश्रन्थो युच् ।" ३ । ३ । १०७ । इति युच् । ) प्रतिमा । इत्यमरः । २ । १० । ३६ ॥ (यथा, माघे ।३।३४ ।

"अनिर्म्मिदा या विदधे विधात्रा
पृथ्वी पृथिव्याः प्रतियातनेव ॥")

तुल्ययातना च ॥

प्रतियोगः, पुं, प्रतियुज्यत इति । प्रति+युज्+भावे घञ् । ) विरोधः । ( पुनरुद्योगः । यथा, भागवते । ४ । १० । २२ ।

"इति ब्रुवंश्चित्ररथः स्वसारथिं
यत्तः परेषां प्रतियोगशङ्कितः ।
शुश्राव शब्दं जलधेरिवेरितं
नभस्वतो दिक्षु रजोऽन्वदृश्यत ॥"

"प्रतियोगः पुनरुद्योगः ।" इति तट्टीकायां श्रीधरस्वामी ॥ )

प्रतियोगी, [ न् ] त्रि, ( प्रतिरूपं युज्यते इति । प्रति+युज+घिनुण् । ) विरोधी । यथा,—

"साध्यवत्प्रतियोगिकान्योन्याभावासामानाधिकरण्यम् । इति चिन्तामणिः ॥ सत्प्रतिपक्षः । यथा,—

"प्रतियोगिनं दृष्ट्वा प्रतियोगी निवर्त्तते ।" इति प्राचीनकारिका ॥

प्रतिरम्भः, पुं, ( प्रति+लभ+भावे घञ् । लस्य रः । ) प्रतिलम्भः । इति द्विरूपकोषः ॥

प्रतिरूपं, क्ली, ( प्रतिगतं प्रतिकृतं वा रूपमिति प्रादिसमासः । ) प्रतिमा । इति त्रिकाण्डशेषः ॥ ( यथा, भागवते । ७ । १० । २१ ।

"भवान् मे खलु भक्तानां सर्व्वेषां प्रतिरूपधृक् ॥"

त्रि, प्रतिगतं रूपमस्य । अनुरूपः । यथा, महाभारते । १ । १०२ । ६१ ।

"आत्मनः प्रतिरूपोऽसौ लब्धः पतिरिति स्थिते ।
विचित्रवीर्य्यं कल्याण्यौ पूजयामासतुः शुभे ॥"

दानवविशेषे, पुं । यथा, महाभारते । १९ । २२७ । ५१ ।

"विश्वजित् प्रतिरूपश्च वृषाण्डो विष्करो मधुः ॥")

प्रतिरूपकं, क्ली, (प्रतिरूप+स्वार्थे कन् । ) प्रतिबिम्बम् । इति जटाधरः ॥ (यथा, महाभारते । १२ । ५६ । ४८ ।

"अग्निदैर्गरदैश्चैव प्रतिरूपककारकैः ।
श्रेणीमुख्योपजापेन वीरुधश्छेदनेन च ॥")

प्रतिरोधः, पुं, ( प्रतिरुध्यते अनेनेति । प्रति+रुध्+करणे घञ् । ) तिरस्कारः । इति चौरशब्दटीकायां भरतः ॥ ( प्रति+रुध्+कर्म्मणि घञ् । ) सत्प्रतिपक्षः । यथा । पक्षसाध्यसाधनप्रसिद्धिस्वरूपा सिद्धिबाधप्रतिरोधानां निरासः । इति सव्यभिचारशिरोमणिः ॥

प्रतिरोधकः, पुं, (प्रतिरुणद्धि प्रतिरुध्य चौर्य्यं करोतीति । प्रति+रुध्+ण्वुल् । ) चौरः । इति हेमचन्द्रः । ३ । ४५ ॥

प्रतिरोधी, [ न् ] पुं, ( प्रतिरुणद्धीति । प्रति+रुध्+णिनिः । प्रतिरोधस्तिरस्कारोऽस्त्यस्येति वा । प्रतिरोध+इनिः । ) चौरः । इत्यमरः । २ । १० । २५ ॥

प्रतिलम्भः, पुं, ( प्रति+लभ+भावे घञ् । ) लाभः । तत्पर्य्यायः । लम्भनम् २ । इति हेमचन्द्रः । यथा, श्रीहर्षः ।

"नैव नः प्रियतमोभयथासौ
यद्यमुं न दयते दयते वा ।
एकतो हि धिगनङ्गगुणाप्ता-
मन्यतः कथमदःप्रतिलम्भः ॥"

प्रतिलोमः, त्रि, ( प्रतिगतं लोम आनुकूल्यं यस्मादिति । "अच् प्रत्यन्ववपूर्व्वात्सामलोम्नः ।" ५ । ४ । ७५ । इति समासान्तोऽच्प्रत्ययः । ) वामः । इति हेमचन्द्रः ॥ (यथा, हरिवंशे । १९७।१४ ।

"बहूनि प्रतिलोमानि पुरा स कृतवान् मयि ।
क्षान्तो नारद ! सोढ़ानि भ्रातेति स मयानघ ! ॥")

विलोमः । यथा,—

"तावुभावप्यसंस्कार्याविति धर्म्मो व्यवस्थितः ।
वैगुण्याज्जन्मनः पूर्व्वं उत्तरः प्रतिलोमतः ॥"
इति मानवे । १० । ६८ ॥

प्रतिलोमजः, त्रि, (प्रतिलोमात् जायते इति । प्रतिलोम+जन्+डः । ) प्रतिलोमजातः । उत्तमवर्णायां अधमवर्णाज्जातः । यथा,—

"संकीर्णयोनयो ये तु प्रतिलोमानुलोमजाः ।
अन्योन्यव्यतिषक्ताश्च तान् प्रवक्ष्याम्यशेषतः ॥"
इति मानवे १० अध्याये ॥

प्रतिवचः, [ स् ] क्ली, ( प्रतिरूपं वचः । ) प्रत्युत्तरम् । इति हेमचन्द्रः ॥ ( यथा, देवीभागवते । १ । ११ । ५४ ।

"सोमः शुक्रवचः श्रुत्वा किञ्चित् क्रोधसमाकुलः ।
भग्नप्रतिवचः प्राह शुक्रदूतं तदा शशी ॥")

प्रतिवचनं, क्ली, (प्रतिरूपं वचनम् ।) प्रतिवाक्यम् । उत्तरम् । इति त्रिकाण्डशेषः ॥ ( यथा, कलाविलासे । २ । ६ ।

"न ददाति प्रतिवचनं विक्रयकाले शठो वणिग् मौनी ।
निक्षेपपाणिपुरुषं दृष्ट्वा सम्भाषणं कुरुते ॥"

प्रतिनिर्द्देशः । इति निरुक्तम् । ६ । ३ । ६ ॥ )

प्रतिवसथः, पुं, ( प्रतिवसन्त्यस्मिन्निति । प्रति+वस्+बाहुलकात् अथ । ) ग्रामः । इति हेमचन्द्रः । ४ । ३७ ॥

प्रतिवाक्, [ च् ] स्त्री, ( प्रतिरूपा वाक् । ) उत्तरम् । इति शब्दरत्नावली ॥ (यथा, महाभारते । ५ । ७२ । ७१ ।

"लाङ्गूलचालनं श्वेव प्रतिवाचो विवर्जनम् ।
दन्तदर्शनमारावस्ततो युद्धं प्रवर्त्तते ॥")

प्रतिवाक्यं क्ली, ( प्रतिरूपं वाक्यम् । ) उत्तरम् । इत्यमरः । १ । ६ । १० ॥

प्रतिवाणिः, स्त्री, ( प्रतिरूपा वाणिः । ) प्रत्युक्तिः । प्रत्युत्तरम् । इति भूरिप्रयोगः ॥

प्रतिवादी, [ न् ] त्रि, ( प्रतिवादोऽस्यास्तीति इनिः । यद्वा, प्रतिकूलं वदतीति । प्रति+वद्+णिनिः । ) प्रतिपक्षः । यथा,—

"यदा त्वेवंविधः पक्षः कल्पितः पूर्व्ववादिना ।
दद्यात्तत्पक्षसम्बद्धं प्रतिवादी तदोत्तरम् ॥"
इति व्यवहारतत्त्वे बृहस्पतिवचनम् ॥

प्रतिवासरः, पुं, ( प्रतिगतो वासरम् । ) प्रतिदिनम् । तद्दिनम् । इति हारावली । १६६ ॥ ( क्ली, वासरं वासरं प्रतीति समासे । प्रतिदिनम् । यथा, राजतरङ्गिण्याम् । २ । १२७ ।

"भूतिप्रवर्द्धमानेऽपि विजयेशाग्रधाम्नः ।
नियमो राजकार्य्येषु तस्याभूत् प्रतिवासरम् ॥")

प्रतिवासी, [ न् ] त्रि, ( प्रत्यासन्नं वसतीति । प्रति+वस्+णिनिः । ) आसन्नगृही । निकट स्थायी । पड़शि इति भाषा । प्रतिवसतीति ग्रहादित्वात् णिनिप्रत्ययनिष्पन्नः ॥

प्रतिबिम्बं, क्ली, ( प्रतिरूपं बिम्बमिति । "कुगतिप्रादयः ।" २ । २ । १८ । इति समासः । ) प्रतिमा । प्रतिच्छाया । इत्यमरः । २।१०।३६ ॥ (यथा, पञ्चदश्याम् । १ । १५ ।

"चिदानन्दमयब्रह्मप्रतिबिम्बसमन्विता ।
तमोरजःसत्त्वगुणा प्रकृतिर्द्विविधा च सा ॥")

प्रतिविषा, स्त्री, ( प्रतीपं विषं यस्याः । ) अतिविषा । इत्यमरः । २।४।९९ ॥ आतइच इति भाषा ॥ (यथा, सुश्रुते उत्तरतन्त्रे । ४० अः ।